National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 247-249
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. रामड्गु श्रीधरः**
अतिथि अध्यापकः,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डॉ. रामड्गु श्रीधरः**
अतिथि अध्यापकः,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# अयनांशतत्त्वविवेकानुसारं अयनांशसाधने प्रथमपक्षविमर्शः

**डॉ. रामड्गु श्रीधरः**

अयनांशसाधनप्रकाराः निरूप्यन्ते यथा -

**प्रथमपक्षः**

**शास्त्रे सौरे दिनौघादयनभगणतश्चायनांशाः प्रसाध्या[1]।**

सूर्यसिद्धान्ते महायुगीयानंशभगणानाम् अवलम्बनेन अहर्गणेन अयनांश साधनम् इति प्रथमपक्षः कथितः।

**द्वितीयपक्षः**

**श्चेत्युक्तं शास्त्रभार्कांतरमपि च तथान्यक्षिभिश्चोपदिष्टम्[2]।**

सूर्यसिद्धान्ते छायार्कगणितार्कयोः अन्तरेण अयनांशसाधनविधिः कथितः।

**तृतीयपक्षः**

**मुंजालाद्यैस्स्वशात्रेष्वविचललवशून्याब्दतो वर्षगत्या[3]।**
**संसाध्याश्चेति चोक्तं पुनरितरबुधैरन्यथा चान्यथा च॥**

मुञ्जलाद्यैः स्वीयतन्त्रेषु अयनशून्यवर्षं प्रारभ्य वार्षीकीं गतिं साधयित्वा अभीष्टकाले अयनांशसाधनविधिः प्रभणितः।

**चतुर्थपक्षः**

**सायनासायनात्यर्क्षध्रुवयोरंतरं हि यत्[4]।**
**तद्रैवताभिधः पक्षश्चतुर्थः प्रतिपादितः॥**

सायननिरयणभध्रुवयोः अन्तरेण संसाधितः अयनांशः यश्च पक्षः रैवतपक्ष इति ख्यातः।

**पञ्चमपक्षः**

**सायनासायनत्वष्टध्रुवयोरंतरं हि यत्[5]।**
**तच्चैत्रनामकः पक्षः पंचमः परिकीर्तितः॥**

सायननिरयणचित्राभोगयोः अन्तरेण साधितः अयनांशः यश्च चित्रापक्षः इत्यभिधीयते।

**षष्ठपक्षः**

**सौरागमस्पष्टदिवाकराजसंक्रांतिकालीनसुविध्दभान्वोः[6]।**
**यदंतरं तच्च चलांशकास्स्युरिदं निरुक्तःखलु षष्ठपक्षः॥**

सूर्यसिद्धान्तस्य स्पष्टसूर्यः तथा मेषसंक्रान्तिकालिकः वेधेनानीतार्कयोः मेष संक्रान्तेश्च अन्तरूपाः अयनांशाः दृक्सिद्धमध्यमसूर्यः सूर्यसिद्धान्तस्य मध्यमसूर्यः अनयोः अन्तरेण साधिताः अयनांशाः।

**सप्तमपक्षः**

**दृक्सिद्धसौरागममध्यभान्वोर्यदंतरं सप्तमपक्ष उक्तः[7]।**

दृक्सिद्धमध्यमसूर्यः सूर्यसिद्धान्तस्य मध्यमसूर्यः अनयोः अन्तरेण साधिताः अयनांशाः।

**अष्टमपक्षः**

**वर्षांतराद्ब्याक्षिसमानभागगत्यार्कशास्त्रायनशून्यवर्षात्[8]।**

**संसाधनं चायनभागकानां यदष्टमः पक्ष उदाहृतोऽत्र॥**

वर्षांतराद्ब्याक्षिसमानभागगत्या अर्कशास्त्रायनशून्यवर्षात् दृक्सिद्धसौरवर्षस्य अयनभागकानाम् संसाधनम्।

**अयनांशसाधने प्रथमपक्षविमर्शः**

अनन्तरं ग्रन्थेऽस्मिन् प्रथमपक्षविमर्शः क्रियते यथा –

**सौरादिशास्त्रेष्वयनांशसाधने[9]**
**संचोदिते च द्विविधे च पद्धती।**
**तत्राद्यमार्गो भगणैःकुवासरौ**
**रहर्गणेनायनभागसाधनम्॥**
**आद्येन मार्गेण च साधिताश्चा**
**यनांशकास्त्वद्य न दृक्समानाः।**
**यतोऽर्कशास्त्रोक्तगतिस्त्विदानीं**
**संदृश्यते दृक्समता विहीना॥**
**पाताधिकारोदितवाक्यतश्च**
**ग्राह्याश्चलांशाःखलु दृक्समानाः।**
**इति स्म सुस्पष्टमतश्च सौरा**
**गमेन चानीतचलांशकास्तु॥**
**स्वीकारयोग्या न भवंति तस्मा**
**दाद्यश्च मार्गो न हि युज्यतेऽद्य।**
**तथापि सौरायनभागकास्तु**
**तत्कालजातांतरसंस्कृताश्चेत्॥**
**स्वल्पांतरा दृक्समभागतुल्या।**
**भवंति नैवात्र विचारणास्ति[10]॥**

सूर्यसिद्धान्ते अयनांशसाधने द्वे पद्धती निरूपिते। तत्र प्रथमप्रकारानुरोधेन कुवासरैः भगणैः महायुगीयायनभगणान् अवलम्ब्य इष्टार्हगणेन अयनांशसाधनं भवति। किन्तु अनेन प्रकारेण साधिता: अयनांशाः साम्प्रतं दृक्समाः न भवन्ति। यतोऽहि सूर्यसिद्धान्तोक्ता वार्षीकिगतिः अधुना दृक्समा नास्ति तात्कालिक-गतिम् अनुसृत्यैव अयनांशाः साधनीयाः इति सूर्यसिद्धान्ते एव प्रतिपादितत्वात् सूर्यसिद्धान्तानुरोधेन संसाधिताः अयनांशाः इदानीं स्वीकारयोग्याः न भवन्ति। तस्मात् सूर्यसिद्धान्तस्य प्रथमपक्षः निरस्यते।

**सौरायनांशकालान्तरसाधनम्**

अनन्तरं ग्रन्थेऽस्मिन् सौरायनांशकालान्तरसाधनम् क्रियते यथा -

**कार्यं कथं वेति हि पृच्छ्यसे चे[11]-**
**त्तत्साधनं सम्यगिहोच्यते च।**
**श्रीशालिवाहाख्यशके च चंद्र-**
**दस्राब्धि(४२१)तुल्येऽयनशून्यतासीत्॥**
**तच्छून्यवर्षाभिमताब्दमध्य**
**संवत्सरा सौरदृगुत्थगत्योः।**
**भेदेन निघ्ना विहृताःखतर्कै (६०)**
**र्लब्धं च लिप्ता विकलाश्च शेषम्॥**
**एतच्च कालांतरसंज्ञकं स्या**
**त्सौरागमोक्तायनवेगजातम्।**
**यतोऽर्कशास्त्रोक्तचलांशवर्ष**
**गतिर्दृगुत्थायनवर्षवेगात्॥**
**बह्वीततस्सौरचलांशकास्तु**
**तत्कालजातांतरशोधिताश्च।**
**भवंति स्वल्पांतरतो हि दृष्टि**
**सिद्धायनांशैस्समतामुपेताः॥**
**अभावतोऽक्ष्युत्थपरायनांश**
**ज्ञानस्य चाप्यंतरसंयुतत्वात्।**
**तथापि कालांतरसंस्कृतत्वा**
**न्मार्गो यमाद्योऽपि च युज्यते च[12]॥** इति

शालीवाहनशकवर्षे ४२१ तमवर्षम् अयनांशशून्यवर्षमासीत्। एवम् अयनां शशून्यवर्षमारभ्य इष्टसंवत्सरपर्यन्तं यावन्ति वर्षाणि व्यतितानि तेषां संख्या साधनीया। ततः परं सूर्यसिद्धान्तोक्त-सम्पातस्य वार्षिकगतेः तथा साम्प्रतं वेधसिद्धसम्पातस्य वार्षिकगतेश्च अन्तरेण सा संख्या गुणनीया। ततः षष्ठ्या विभज्यते चेत् कलात्मकफलमायाति। एतत्फलं सूर्यसिद्धान्तानुरोधेन आनीतेशु अयनांशेषु विशोध्यते चेत् स्वल्पान्तरेण दृक्तुल्याः अयनांशाः उपलभ्यन्ते इति श्रीपादवेङ्कटदैवज्ञशर्मणाम् अभिप्रायः। सम्पातस्य वार्षिकगतिः सूर्यसिद्धन्तानु रोधेन अधिका विद्यते। ५४ विकलात्मिकागतिः सूर्यसिद्धान्ते कथिता विद्यते। साम्प्रतं तु सम्पातस्य वार्षिकीगति: स्वल्पान्तरेण ५० विकलामिता उपलभ्यते। तस्मादेव कारणात् सूर्यसिद्धान्तानुरोधेन आनीतेभ्य: अयनांशेभ्यः फलमेतत् विशोधनीयमिति निरुक्तम्।

इष्टशकवर्षम्-अयनशून्यवर्षम् = शेषवर्षाणि

शेषवर्षाणि ×सम्पातस्य सूर्यसिद्धान्तोक्तवार्षिकीगतिः**-** सम्पातस्य साम्प्रतवेधसिद्ध-

वार्षिकीगतिः=६० कलात्मकं फलम्।

सूर्यसिद्धान्तानोरोधेन साधितायनांशाः - कलात्मकं फलम् = स्फुटायनांशाः (स्वल्पान्तरेण)

**अयनशून्यकालनिर्णयः**

पश्चात् ग्रन्थेस्मिन् अयनशून्यकालनिर्णयविषयः चार्च्यते यथा -

अयनशून्यकालनिर्णयविषये त्रयः मतभेदाः सन्ति। सूर्यसिद्धान्त-रीत्या सम्पातगतिमङ्गीकुर्मश्चेत् स्वल्पान्तरेण ४२१ शकवर्षे अयनशून्य-वर्षत्वेन समायाति। मुञ्चालादीनां मतानुरोधेन ४४४

शकवर्षम् अयनशून्यवर्षं भवति। वराहमिहिराचार्याणां मतानुरोधेन ४२१ शकवर्षम् अयनशून्यवर्षमिति प्रतिभाति। वराहमिहिराचार्याः स्वीयकाले अयनांशाः नासन् इति जगदुः। ते स्वरचित बृहत्संहितायां सूर्यचाराध्याये विषयमिमं स्पष्टीचक्रुः। यथा-

**आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।**
**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ।**
**सांप्रतमयनं सवितुः कर्काटकाद्यं मृगादितश्चान्यत् ।**
**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।** इति

पूर्वशास्त्रेषु उक्तत्वात् कस्मिंश्चित् काले दक्षिणायनस्यारम्भः आश्लेषार्धात् उत्तरायनस्य प्रवृत्तिः धनिष्ठादितश्च अवश्यमेवासीत् । अर्थात् पुनर्वसुतृतीयात् चरणात् आरभ्यमाणं दक्षिणायनम् आश्लेषार्धातुः आरब्धमिति कारणेन अवश्यम् अयनांशाः आसन् इति वराहमिहिराचार्याः अभिप्रयन्ति। किन्तु स्वीयकाले तु मकारादितः एव उत्तरायणं तथा च कर्कादितः एव दक्षिणायनं इति स्पष्टं तैरुक्तम्। तस्मात् तेषां काले अयनांशाः नासन् इति तेषामेव वचनैः स्पष्टं भवति। यतो हि तैः वेधेनैतत् ज्ञात्वैव प्रतिपादितम्। तत्परीक्षणप्रकारोऽ-पितैर्निर्दिष्टः।

यथा-

**दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः ।**
**छायाप्रवेशनिर्गमचिह्नैर्वा मंडले महति॥** इति।

तत्काले प्रत्यक्षवेधेन परीक्ष्य अयनांशाः निर्णेतव्याः इति वराहमिहिराचार्याः आदिशन्ति। तस्मात् महतः गणितज्ञस्य वराहमिहिरस्य वचनमवलम्ब्य तस्यैव कालः अयनशून्यकालः इति स्वीकरणे अधिकमौचित्यमिति प्रतिभाति।

**आश्लेषार्धादासीत् यदा निवृत्तिः किलोष्णकिरणस्य।**
**युक्तमयनं तदासीत् साम्प्रतमयनं पुनर्वसुतः ॥**

पञ्चसिद्धान्तिकान्तर्गतपौलिशसिद्धान्तस्य श्लोकोऽयं इममेव विचारं द्रढीकरोति। किन्तु वराहमिहिरस्यापि काले ३०-२०" अयनांशाः आसन्निति केचन प्रतिपादयन्ति। बृहत्संहितायाम् **"आश्लेषार्धात्"** इति नक्षत्रम् उल्लिख्य तदनन्तरश्लोके **"कर्कटाद्यम्"** इति राशेः समुल्लेखः कृतः इति कारणात् अत्र सायणराशिमङ्गीकृत्य तेनोक्तमिति तेषामाशयः। किन्तु **"साम्प्रतमयनं पुनर्वसुतः"** इति नक्षत्रमवलम्ब्य दक्षिणायनारम्भः इति तैः स्पष्टतया उक्तं विद्यते। तेन तेषां काले अयनांशाः नासन् इति स्पष्टं भवति । किन्तु **"आश्लेषार्धात्"** इत्यनेन अनुवृत्तिबलात् **"पुनवसुतः"** इत्यन्तः पुनर्वस्वर्धे इत्यर्थो लभ्यते इति केचित्व्याख्यानं कृत्वा तेषां काले अयनांशस्थितिं समर्थयन्ति।किन्तु **"आश्लेषार्धात्"** इति पदं बृहत्संहितायां **"पुनर्वसुतः"** इति पदं तु पञ्चसिद्धान्तिकायाः पौलिशसिद्धान्ते च विद्यमैनं भवति। तस्मात् ग्रन्थान्तरस्य वचनैः अनुवृत्तिः कुत्रापि वक्तुं न शक्यते इति तु पामरोऽपि जानाति । तस्मात् वराहमिहिरस्य काले अयनांशाः आसन्निति वादः प्रमाणशून्यः इति स्पष्टं प्रतिभाति।

**उपयुक्तग्रन्थसूची**


1. सूर्यसिद्धान्तः
2. अयनांशतत्त्वविवेकः
3. सिद्धान्तशिरोमणिः
4. केतकीग्रहगणितम्
5. ज्योतिर्विज्ञानम्
6. सिद्धान्ततत्त्वविवेकः
7. भारतीयज्योतिषशास्त्रेतिहासः


**सन्दर्भः**

[1] अ.त.वि.प्र.अ.श्लो.सं. १६६
[2] अ.त.वि.प्र.अ.श्लो.सं. १६६
[3] अ.त.वि.प्र.अ.श्लो.सं. १६६
[4] अ.त.वि.प्र.अ.श्लो.सं. १६७
[5] अ.त.वि.प्र.अ.श्लो.सं. १६८
[6] अ.त.वि.प्र.अ.श्लो.सं. १६९
[7] अ.त.वि.प्र.अ.श्लो.सं. १७०
[8] अ.त.वि.प्र.अ.श्लो.सं. १७०
[9] अ.त.वि.प्र.अ.श्लो.सं. १७१
[10] अ.त.वि.प्र.अ.श्लो.सं. १७२-१७४
[11] अ.त.वि.प्र.अ.श्लो.सं. १७५-१७८
[12] अ.त.वि.प्र.अ.श्लो.सं.१७९